# राघवपाण्डवीयम् महाकाव्यस्य कथावैशिष्ट्यम



डॉ॰दीपमाला उपाध्याय
भूतपूर्व शोध छात्रा (साहित्य विभाग )
सम्पूर्णानन्द संस्कृत विश्वविद्यालय वाराणसी,
उत्तर प्रदेश, भारत।

महाकवि: कविराज: स्वग्रन्थस्यप्रथमसर्गादारभ्यान्तिमसर्गपर्यन्तम् श्लेष्महिम्ना रामायण महाभारतयो: कथानकयो: सामान्यरुपेण उपस्थापनम् करोति | परञ्च क्वचित- क्वचिदयम् निर्वाह: समीचीनतामपि गतो वर्त्तते| अन्यथा व्यासेन बाल्मीकिरनुश्रुतित्यsपि आक्षेप: भवितुम् शक्यते| कविना रामपक्षस्य वर्णनम् कुर्वन् युधिष्ठिर साम्यं स्थापितम्| एवमेव रावणपक्षस्य दुर्योधनपक्षेण सह साम्यं कृतम्| साम्यवर्णनाsवसरे स्व प्रतिभाप्रकर्षेण तथा विधानमपि घटनाक्रमानुल्लासयति यान् चानुभूय सहृदयपाठका: प्रमुग्धा: भवन्ति|

ग्रंथस्य प्रारम्भे विघ्नविघातायेष्टदेवतापरामर्शनपुरस्समयं कवि आदिकविं बाल्मीकिं पुराणकविं व्यासञ्च नमस्करोति| अनन्तरं स्वाश्रयदातारं कदम्बकुल भूषणम् राजानं कामदेवं प्रशंसति| यस्य प्रेरणया ग्रन्थरचनायामयं प्रवृतोभूत | तत: श्लेषकाव्यरचनाशैलीमुदभावयन्ति| सज्जनप्रशंसापूर्वकं स्वग्रंथे तेषां प्रवृत्तिर्भवेदिति प्रार्थना विधाय ग्रन्थरचनायां प्रवृतो भवति | ग्रंथारम्भे राज्ञ: दशरथस्य जीवनवृत्तेन सह राज्ञ: पाण्डो: जीवनवृत्तस्य वर्णनम् कृतमस्ति| तत्राsपि प्राधान्येन द्वयोरपि मृगयाविहार: ,मुनिवध: ,शापश्चेति नैपुण्येन व्यवस्थापिता: सन्ति| अनन्तरम् द्वयोरपि पुत्राणामुत्पत्ति:,बुद्धि: तन्मध्ये च घटिता नां घटनाक्रमाणां वर्णनसहैव रामस्य विश्वामित्रेण सह वनाय प्रेषणम् युधिष्ठिरस्य वारणावातनगरं प्रति प्रेषणमपि च रामस्य ताड़का दर्शनमेकस्या च ताड़कावध:, अपराया: हिडिंबायाश्च परिणय: वर्णित: |

“विलङ्घ्य गङ्गा व्रजत: सुदूरमम्लानदेहस्य बलानुभावात्
तस्याग्रत: सुन्दरतोज्जवलाङ्गी निशाचरी प्रादुरभून्मदान्धा||”

द्वितीय सर्गस्य प्रारम्भ: रामस्य जनकपुरे स्वयंवरवर्णनेन तथा च युधिष्ठिरस्य पाञ्चालनरेशस्य द्रुपदस्य पुत्र्या द्रौपद्या सह स्वयंवरवर्णनेन कविना कृत: | विवाहानन्तरम् प्रति संप्राप्तानां रामादिकानां पितृभक्ति: युधिष्ठिरादिकाञ्च पितृव्यभक्तिश्लिष्ट प्रस्तुतावर्त्तते|

अनन्तरमुभयपक्षयो: वनगमनम् रामकृत विराधवध: भीमकृत किरमीरवध: तृतीयसर्ग पर्यन्तगुपलभ्यते | चतुर्थे सर्गे अर्जुनकृततपस्या द्वारा प्राप्तं भगवत: शंकरस्य दर्शनं रामकृतागगत्स्य ऋषिदर्शनेन सह संयोजितमस्ति| तथैवोभयपक्षद्वारा उभयो: शस्त्रप्राप्तिरपि वर्णितास्ति|

“तमग्रतो दर्शितविग्रहं प्रभुं, कृतप्रसादं प्रणिपत्य मौलिना |
स कुम्भ जन्मानमवाप्य शंकरात्, ततो धनुर्वेदमयं समादधे ||”

पञ्चमेसर्गे पंचवटी संप्राप्त रावणस्य प्रसंगेन् सह पांडावानां वनविना सस्थलम् संप्राप्त दुर्योधनस्य प्रसङ्ग साम्यं व्यवस्थापितम्, तथैव रावणकृत सीतापहरणस्य, जयद्रव्यकृतद्वौपद्यापाहरणस्य वर्णितम्|

षष्ठसर्गस्य प्रारम्भेऽव्यवस्थितरुपेण साधारणघटनाक्रमानसम्मेल्य कविग्रेसरे भवति | सप्तमसर्गस्य प्रारंभे रामसेनासमारोहेण सह युधिष्ठिरसैन्य समारोह: कविना वर्णित: | तत: युद्धात् पूर्व रामसमीपम् विभीषणस्यागमनं युधिष्ठिर समीपं च घटोत्कचास्यागमनं योजितमस्ति|

अष्टमसर्गस्य प्रारम्भेपक्षद्वयो: युद्धस्य वर्णनं कुर्वन्,श्लेषमहिम्ना रामरावणसैनिकानां युधिष्ठिरदुर्योधन सैनिकानां वर्णनं कुर्वन् समस्तसैन्यसमुदायस्य प्रधानवीराणां

नामोल्लेखपुरस्रं वह्नि पुत्रस्य नीलस्य वह्नि प्रभावस्य सेनापतिधृष्टद्युमनय च साम्येन वर्णनं कृतम्| रामलक्ष्मणयो: नागपाशबंधनात्मकम् कथात्मकम् भीष्मस्य नागसदृश बाणै आच्छादितयो कृष्णाऽर्जुनयो: कथानकेन सह व्यवस्थापितं|

यथा - "नरनारायणौ साक्षादिव तौ रामलक्ष्मणौ|
सचक्रौ स तिरश्चक्रे नागरूपधरै: शरै: ||"

नवमसर्गस्य प्रारम्भे सेनयोरुभयो: युद्धस्य विस्तृतं वर्णनं श्लेषद्वारोपस्थाप्य सुग्रीवेणावमानितस्य रावणस्य लङ्कानगरं प्रति कृतगमनमर्जुनद्वारा किरीटखण्डितस्य वर्णस्य सायन्तनेकृतशिविरप्रवेशेण मेलयति|

दशमसर्गस्य प्रारम्भे स्वजनबधक्रोधान्धस्य रावणस्य तथैव दुर्योधनस्य स्व स्व विशालसैन्य संगठन प्रक्रिया प्रदर्शयति| अत्र रावणस्य सैन्य संघटनं द्रोणाचार्य कृत चक्रव्यूह निर्माणेन मेलयति|

द्वादशसर्गस्यादौ रावणद्वारा युद्धविजयाशया स्वपुत्र: मेघनाद: युद्धार्थं प्रेषित: , तथैव दुर्योधनेनाऽपि विजयार्थं युद्धक्षेत्रम् कर्ण: प्रेषित: |

त्रयोदशसर्गस्य प्रारंभे कवि: प्रथमं रावणस्य स्व नगरात् बहि: युद्धार्थम प्रस्तुतमनुभूय रामसैन्य द्वारा लङ्का नगस्यावरोध: तथा च तदनंतरं रावणस्ययुद्धक्षेत्रागमनं पाण्डवपक्षेतु दुर्योद्धनस्य व्याससरोवरात् निर्गमनात्सैन्य सहितेन राज्ञा युधिष्ठिरेण व्याससरोवरस्यावरोध: ततश्च दुर्योधनास्य युद्धार्थं वहिरागमनं वर्णयति| वर्णनामिदं समस्तमपि श्लेषमहिम्ना कविना विधाय रामं युधिष्ठिरं स्वाश्रयदाताराजानं कामदेवं च पृथिव्या: पालनार्थं प्रार्थयन् कवि: ग्रन्थं समापयति|

**संदर्भ सूची -**

**1- राघवपांडवीयम्**

**2- रामायण**

**3- महाभारत**

**4- श्रीमदभागवतम्**

**5- विष्णुपुराणम्**